BD 264/14 FF 6

No 657

मानवीय परिशिष्ट

१

॥अथप्रतियहकल्पप्रारंभः॥ श्रीरामचंद्रप्रसन्नोस्तु॥

रामु
१

॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥ श्रीगुरुभ्योनमः॥ ॥अथातः प्रतिग्रहकल्पंव्याख्यास्यामोदक्षिणां प्रतिगृह्णीयात्नानावेदविन्नाशुचिर्नायज्ञोपवीतिनमुक्तशिखोनार्द्रेणानानुदकेनचाकालसंधि वः पुरस्तात्कृष्णमितिपश्चात्प्रजापतयेत्वेतिपुरुषंप्रतिगृह्णीयात्॥ हस्तिनंपुरुषंभूमिंपाणिना न्यत्सर्वंजीवान्यूर्वरांवंध्यायत्वेतिशिरः यमायत्वेसेकशफंरुद्रायत्वेतिगामग्नयत्वेतिहिरण्यं वपुसीमयोलोहंवरुणायत्वेसकृदकुंभंकूपंतडागंवसमुद्रायत्वेतिकरकंशंखशुक्तिंप्रवालानिय न्यत्किंचित्सामुद्रंयद्भूस्पृष्टान्सोमायत्वेतिराजानंगंधर्वायत्वेतिगंधर्वंयौवनस्थौ श्वेवेश्वानरायत्वेतिकृतान्नसासंभृतानानादक्षिणास्तांदक्षिणंप्रतिगृह्णीयात्॥ पार्थिव्यांपुण्यं चपापंचकस्तेप्रतिपश्यतिदृष्टपुण्यंचपापंचआदित्यप्रतिपश्यति॥ यदादातप्रदातासर्व सस्यानांजन्मकालेपुनःपुनरिति॥१॥ पुरुषंहस्तेगृहीत्वाप्रशारोवीरंबाहुभ्यांबाहुकरीम शिरुह्यहस्तिनं॥पुरुषंभूमिंप्राष्ठेऽश्वंगांपुच्छेहिरण्यंगृहीत्वावासःपरिधायाक्रम्यजाप्राण छत्रेदंडेरथमीशायांग्रामंमध्येगृहंप्रविश्यशय्यारुह्याजकर्णमेषमर्णायांमहिषेश्रृंगउद कुंभंगृहीत्वाकूपमवलोक्यतडागमवतीर्यकरकंशंखशुक्तिंप्रवालानिगृहीत्वायत्किंचित्सामुद्रंशंकुनाचोष्ट्रान्प्रतोदेनखरान्अश्वतरानुक्षिप्यरसा ननुलिम्लंगंधान् स्त्रग्दामोंचरुह्यवनस्पतीमन्नंगृहीत्वाश्रायंमेब्राह्मणस्यमंडोराज्यस्यउपाऽश्रु नोवेश्यस्यशूद्रस्यगृहान्निष्क्रम्य ... बहिरुपस्पृश्यमनसामंत्रमावर्तयेत्॥ यएव

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ॐ विद्वान्प्रतिगृह्णातिपुनातिपुनातिदातारंपुनातिचात्मानंपुनातिदक्षिणादेवेषुवेनाहदेवेषुयेनाह मिति॥२॥ ॥इतिप्रतिग्रहकल्पः॥ ॥अथातोमूलजातस्यविधिंमूलस्यप्रथमेशेषि तुर्नेष्टेदिनीयेमातुस्तृतीयेधनस्यचतुर्थेकुलशोकावहः॥ आत्मनोवापुष्पभागीभवतितत्रो दकुंभंकुर्यात्तस्मिन्रुद्रान्जपित्वाअप्रतिरथंरक्षोघ्नंसूक्तंचद्विनीयोदकुंभश्चतुः प्र स्रवनसंयुक्तस्तस्मिन्मूलानिधारयेद्धंशायत्रकृतानितेषांप्रधानानिमूलानिवक्ष्या मिप्रथमावश्मकर्योसहदेवीअपराजितांअधः पुष्पिशंखपुष्पीबलापाटालमयूरशिखामधुपु ष्पिकाचक्रांकिताकाकजंघाकुमारीद्वयंवेजयंतीअपामार्गभृंगराकंलक्ष्मणाजातीव्याघ्रपत्रक चक्रमर्कपिप्पलेश्वराअश्वत्थसहपक्षाउदुंबरपूक्षशमीअर्कैरोहीतकबिल्वकइत्येवमा दीनिमूलशूरपित्वामध्येमूलंहेममयंचकुर्यात्सप्तधान्यसंयुक्तंतेषांनिपिधा निमूलानिवक्ष्यामिनैल्वकधवनिंबशाल्मलिराजवृक्षश्लेष्मांतकसर्वकंटकिवर्जे॥ तत्रासिष र्कंकुर्वीतपितुः शिशोर्जनन्यादेवरस्याऊसंद्यायामासीनायाः संपातेनाभिषिंचतिशिरसो द्यामुखाद्यशिरोमेश्रीर्यशइतियथालिंगमंगानिसंमृशेन्मिलाताभुरिष्टालेर्ऋतंपयसिरुशालो पाकंअपयित्वाकाष्ठमर्यमयापरिधिमिधासकूस्रवंसमज्याघारावाज्यभागौहुत्वाअस न्नेतमयंमानमितिचतस्रः स्रुचोपाकस्यहुत्वायाश्चुभासवसइतिपंचदशाज्याहुतीर्जुहु यात्नानस्तोकइतियातेरुद्रशिवातनुरितिपंचाग्नेरक्षंसिसेधमितिद्वाभ्यंस्विष्टकृतंहु त्वासमामेकृष्णाश्वगोः कृष्णाश्वनीलहेममयंमूलंसप्तधान्यंचआचार्यायदद्यात्॥ ब्रह्म णेकृष्णाअनड्वान्यथाशक्त्याब्राह्मणेभ्यस्तवर्णदद्यात्॥ ब्राह्मणान्भोजयेत्कुमार

२

पायसान्नमाज्यस॰युक्तं॰ सर्वं॰ शोभनंक्षेममारोग्यंमर्वाशिषः सं पदासर्वमंगलैसंपदाचरवे नेअ
र्कनदेवनेगरयोगेचविधिर्मनुनादिष्टः शांतिकराक्षमकराशुभकराधनधान्यकृष्टिकरीसर्वकुल १
रक्षणीभयशोकापहारिणीबलभाग्यशुभकरा इति॥ इतिमानवसूत्रेमूलादिजानशांतिवि-
धिः॥१॥ अथयमशांतिः॥ ॥अस्ययमलोपुत्रोगावोवउवेवायेयाता॰ स॰ वत्सरेपूर्णदा
दशवत्सरोवाद्वादशरात्रेवासमकर्षायानादेवत्रअश्वत्थ मुदुंबर॰ विकंकतन्यग्रोधप्लक्षशमी
शमकत्रियंगुगौरसर्षपा॰ श्चयदिनानिनविंदेद्धिरण्यस्नान॰ हिरण्यवर्णाः शुचय इतिच
तसभिश्चतुष्पादेभद्रपीठेप्राङ्मुखानुपवेश्यमृण्मयेनशतधारेणवैजलक॰ सहस्रधारमंतधा
यायाओषधयः समंन्यायंतीस्तनुवाकाभ्यांचतस्रोविधवाः स्नापयेयुश्चतारोवाब्रह्मचारि
णः स्नातालंकृतोदंपतीप्रदक्षिणंअग्निंपरिणयेतू॥ पश्चादग्नेर्दर्भपूपविश्यमा रुतस्य
रुशलीपाकस्यप्रियवतीर्व्याससक्तूंस्त्रीवरनुजुहोति॥ ऋषभैकादक्षिणापुरस्तादग्नेः सम
कर्षूनूखातानूगंधोदकेनपूरयित्वाजयप्रभृतिभिश्चाज्यश्चपुरस्तात्स्विष्टकृतोहिरण्यग
र्भइत्यष्टाभिः प्रकुर्वंमितिक्रमेदृष्टमींजपेदाहिताग्निश्चोदनेनविधिनाव्याख्यास्यामो मा
रुतंत्रयोदशकपालंनिर्वपेतू॥ तस्यागोर्धेनुर्दक्षिणायदिनानिनविंदेतूक्षत्रं॰ कसम
ध्वंदशात्यवक्षेत्रंनिरुक्षेत्रंवायदिनानिनविंदेतू॥ लोमवस्त्वतुगवछन्नोवाशवाग्निं प्रविशे
त्सएतस्यानुहः॥ इतियमलजातिशांतिः॥ ॥अथातोअश्लेषाविधिंव्याख्यास्यामः॥॥
प्रथमेपादेजातनाशश्चतुर्थेपितुर्विनाशस्तत्रमूलविधानोक्तौषधिशतंगृहीत्वातांम्रपात्रोपरि वं शम्
शपात्रंनिधायतंतुलोपरिस्थाप्यतस्योपरिहेमनिर्मितंसर्पमधोमुखं प्रतिष्ठाप्यपंचग २

येनस्नपनंकृत्वावस्त्रयुग्मेनवेष्टयेत्यज्ञोपवीतेनसगंधैः पंचवर्णपुष्पैर्धूपदीपैर्नानाभक्ष्यभोज्योप
हारैस्तांबूलादिभिर्नानाविधफलैश्चनमोस्तुसर्पेभ्यइतिसुवर्णसर्पंपूजयेतू॥ ततश्चतुरः कुंभा
न्॥ प्रतिष्ठाप्यप्रथमंनिर्झरोदकेनदक्षिणतोपिसंपूर्यतत्र प्रथमसप्तमृत्तिकाः द्वितीयेदेवदारुमु
स्ताचसिद्धार्थउशीरहरिद्रागुडूचीचंदनंतृतीयेसर्वौषध्यश्चतुर्थेसर्वमिदंकृत्वासमुद्गछेनि
चतुर्भिर्मंत्रैः सर्वमंत्र्यगंधपुष्पादिभिः संपूज्यशुभेनिशुभनक्षत्रेशुभलग्नेशुभवेलायां
यजमानः शुचिर्भूत्वाअहतेवाससीपरिधायगंधाद्यैरलंकृतमाचार्यं नमस्कृत्यऋ
ग्भिः सहपुण्याहवाचनंकृत्वाकलशेषुमध्येस्थंडिलंकृत्वाअग्निंप्रतिष्ठाप्यस्थालीपाकं॰ श्रप
यित्वाआघारावाज्यभागाभ्यांहुत्वातत्रस्विष्टकृतंप्रायश्चित्तांताहुतींहुत्वापूर्णाहुतिंदत्वाऽचार्यः शिष्यंमातरं
पितरंसर्वौषधितिलसर्षपसंयुक्तमुदकंकलशादुपसृत्यऋग्भिः॥ सहचतुर्भिः कलशैरभि
षिंचेत्पूर्ववद्दक्षिणाद्यनिशेषोव्याख्यातः॥ ॥इतिमानवसूत्रेअश्लेषाविधिः॥ ॥
शेकशेषान॥ ॥दंतजन्मनिबालानांलक्षणंतन्निबोधये ॥ उपरिप्रथमं॰ यस्यजायंतेच
शिशोर्द्विजाः॥ दंतैर्वासहयस्यस्याज्जन्मभार्गवसत्तम॥ मातरंपितरंचाथस्वादेहात्मानमेवच॥
तत्रशांतिप्रवक्ष्यामितांमेनिगदतः शृणु॥ गजदृष्टगतंबालंनो स्थंवास्नापयेत्तद्विजः॥ तदभा
वेनधर्मज्ञः कांचनेचवरासने॥ सर्वौषधैः सर्वगंधैश्चबीजैः पुष्पैः फलैस्तथा॥ पंचगव्येनर
त्नैश्चपताकाभिश्चभार्गवे॥ स्थालीपाकेनधातारंपूजयेत्तदनंतरं॥ सप्ताहंचात्रकर्तव्यंतथा

ब्राह्मणभोजने॥ अष्टमेह्नि विप्राणां तथा दद्याद्दक्षिणा॥ कोचनं रजतं चाथ भुवमात्मानमेव च॥ दैवज्ञ
न्मनिसामान्ये शृणुस्नानमतः परं॥ भद्रासनेनिवेश्यैनं मृद्भिर्मूलैः फलैस्तथा॥ सर्वौषधैः सर्वौजश्च
सर्वगंधैस्तथैव च॥ स्नापयेत्पूजयेच्चात्र वह्निसोमंसमीरणं॥ प्रथमं रुद्रापयेत्तत्र देवदेवं च केश
वं॥ तेषामेवानुजुहुयात्पृथगग्नीन्यथाविधि॥ ब्राह्मणानांच दातव्यानतः पूजाच दक्षिणा॥ भासंत
छत्रमूर्ध्वंनं वीजैः स्नापयेन्नतः स्निग्धैर्यालिकानांचनैश्च कार्यं प्रपूजनं॥ पूज्याश्चाविध
वानार्याब्राह्मणाः सद्दक्षस्तथा॥ इतिविष्णुधर्मोक्तासदंतोन्तिशांतिः॥ अकालप्रसवानार्यः
कालातीतप्रजास्तथा॥ अमानुषाअभंशाश्च अजातव्यंजनास्तथा॥ हीनांगाअधिकांगाश्च जा
यंतेयदिवास्त्रियः॥ पशवः पक्षिणश्चैव तथैवसचरीसृपाः॥ विनाशंतस्यदेशस्य कुलस्यच
विनिर्दिशेत्॥ निर्वासयेन्नान्नपतिः स्वराष्ट्रात्स्त्रियश्चपूजयाश्चतोद्विजेंद्राः॥ फलादि
कैर्ब्राह्मणतर्पणंचलोकेतनःशांतिमुपैतिपापं॥ इतिप्रवक्ष्येरुद्रशांतिः॥ ॥अथातो रुद्र
जपस्यविधानकल्पंव्याख्यास्यामः॥ उत्तरतोग्रामस्यपुरस्ताद्वाशुचौदेशेनदीषु देवखातेषु
तडागेषामलापकर्षणंकृत्वाप्राणायामत्रयंकुर्यात्॥ रुद्रस्नानंकुर्वीत॥ नमः शंभवेचेतिस्नो
त्वाअसंख्याताःसहस्राणीतिदशभिर्मार्जनमुत्तीर्यवस्त्रेचपरिधायाचम्यरुद्रंन्यसेत्॥ यानेते
रुद्रइतिशिखायां॥ येअस्मिन्महत्यर्णवइतिशिरसि॥ असंख्याताइतिललाटे॥ नमो
नीलग्रीवायेतिकंठे॥ नमस्ताआयुधायानाततायेतिबाह्वोः॥ नमोगिरिकेभ्यइतिहृदये॥ राम्
हिरण्यगर्भइतिनाभ्यां॥ नमोगणेभ्योइतिपृष्ठे॥ नमोमीढुष्टमायचेतिकट्यां॥ नमोरुद्रायत ३
वसेतिगुह्ये॥ मानोमहांतमित्यूर्वोः॥ येपथांपथिरक्षइतिपादयोः॥ अध्यवोचेतिकवचं॥
नमोबिल्मिनेचेत्युपकवचं॥ प्रमुंचधन्वनइत्यस्त्रं॥ एतावदेतदितिदिग्बंधः॥ ॐ नमोभ

१ कपर्दीयेतिचक्षुषोः॥ नमःश्रुतायचश्रुतसेनायचेतिकर्णयोः॥ अवतत्यधनुष्ट्वमितिमुखे॥ नमोनील

गवतेरुद्रायेतिविन्यसेत्॥ ॐकारंमूर्धनिविन्यस्यनकारंनासिकेतथा॥ मोकारंतुललाटेचभकारं
मुखमध्यतः॥ गकारंकंठदेशेतुवकारंहृदयंन्यसेत्॥ तेकारंदक्षिणेहस्तेरुकारंवामतोन्य
सेत्॥ शकारंनाभिमध्येतुयकारंपादयोस्तथा॥ त्रातारमिंद्र० प्राचीदिशाधिपतयेइंद्रायनमः॥
त्वन्नोअग्ने० आग्नेयदिशाधिपतयेअग्नयेनमः॥ स्कगन्नुपंथा० दक्षिणादिशाधिपतयेयमा
यनमः॥ असन्नेतमयजमान० नैर्ऋत्यदिशाधिपतयेनिर्ऋतयेनमः॥ तत्वायामि० पश्चिमदि
शाधिपतयेवरुणायनमः॥ आनोनियुद्भिः० वायव्यदिशाधिपतयेवायवेनमः॥ त्रयंसोमक
तुभिः० उदीच्यदिशाधिपतयेकुबेरायनमः॥ तमीशानं० ईशानदिगधिपतयेईशानायनमः॥
इमारुद्रायतवसे० ऊर्ध्वदिगधिपतयेब्रह्मणेनमः॥ स्योनापृथिवी० अधोदिगधिपतयेऽनंता
यनमः॥ इत्यंतर्दिक्संपुटं॥ एवमेवात्मनिरौद्रीकरणंकृत्वा त्वगस्थिगतैः पापैः प्रमुच्यते॥
अनेनविधिनायोग्रामे नस्त्रीश्रवणेनश्राध्यआमंत्रितोनयशुसंनिधौयक्षराक्षसभूतपै
पिशाचयमदूतशाकिनीतस्कराकृपधात्राः सर्वेतेज्वलंतंपश्यंस्तात्मानंरुद्ररूपंध्यायेत्॥
त्रिनेत्रंपंचवक्त्रंदशभुजंसोम्यंसर्वाभरणभूषितम्॥ नीलग्रीवंशशांकचिन्हंशुध्यस्फटिक
संकाशंनागयज्ञोपवीतिनंव्याघ्रचर्मोत्तरीयकंकमंडत्वक्षसूत्रहस्तमभयप्रदंत्रिशूलहस्तं
पिनाकपाणिंवृषभस्कंधसमारूढंसुमादेहार्द्धधारिणंज्वलंतंकपिलजटंजरामुकुटसंयु
क्तंशिखमुद्योतकारिणममृतेनाप्लुतंहृष्टंस्तवास्करैर्नमस्कृतंदिग्देवतैःसमायुक्तंनित्यंचशा
श्वतंशिवंध्रुवमक्षयमव्ययंसर्वव्यापीनिरंजनमीशानंरुद्रंविश्वरूपिणं॥ एवंध्यात्वाद्विजः
सम्यक्कृत्वोजपमारभेत्॥ स्वगृहेदेशेगोचर्मात्रेस्थंडिलेवानुलिप्तेबालिंगंपद्माकृतिंत्रिकं
ल्यप्रोक्ष्य॥ मानोमहांतइतिस्थापयेत्॥ नमःशंभवेचेत्यर्चयेत्॥ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः॥

नेति रुद्रस्यावाहनं॥ सद्योजातरूपेतस्य सद्योजातऋषिः ब्रह्मादेवता त्रिष्टुप्छंदः हंसवाहनपश्चिमवक्त्र
पृथिवीतत्त्वब्रह्मरूपायह्रीं पश्चिमवक्त्रावाहनेविनियोगः॥ सद्योजातो॰ पश्चिमवक्त्रायनमः आवाह
यामि॥ वाममघसवितरित्यस्यवामदेवऋषिः विष्णुर्देवतात्रिष्टुप्छंदः गरुडवाहनउत्तरवक्त्रआ
पस्तत्त्वविष्णुरूपायह्रीं उत्तरवक्त्रावाहनेवि॰ वाममघसवितृ॰ उत्तरवक्त्रायनमः आवाहया
मि॥ आघोरेत्यस्यअघोरऋषिः रुद्रोदेवता बृहतीछंदः वृषभवाहनंदक्षिणवक्त्रंतेजस्त
त्वरुद्ररूपायह्रूं दक्षिणवक्त्रावाहनेवि॰ अघोरेभ्यो॰ दक्षिणवक्त्रायनमः आवाहयामि॥ त
त्पुरुषेत्यस्यतत्पुरुषऋषिः सूर्योदेवता गायत्रीछंदः अश्ववाहनपूर्वकंवायुस्तत्वसूर्य
रूपायक्रूंपूर्ववक्त्रायनमः॥ आवाहयामि॥ तमीशानमित्यस्येशानऋषिः शब्दो देवता
बृहतीछंदः कूर्मवाहनेऊर्ध्ववक्त्रआकाशतत्त्वश्वेतरूपायह्रोंऊर्ध्ववक्त्रावाहनेवि॰ तमी
शानं॰ ऊर्ध्ववक्त्रायनमः॥ आवाहयामि॥ आवाहनंतिरुद्रगायत्रीमष्टोत्तरशतः प्रमुंजीत
रुद्रंध्यायेत्॥ नीलकंठंमहादेवंकैलासस्थंसहोमया॥ त्रिनेत्रमीश्वरंचैवध्यात्वासिध्यिमवा
प्नुयात्॥ ततोजपमारभेत्॥ नमस्तेरुद्रमन्यवइतिपञ्चभिरष्टभिरनुवाकैः॥ प्रथमानुवाकेगा
यत्रीछंदः तिस्रस्त्रिष्टुभनिस्रः पंक्तयः सप्तानुष्टुभंत्यानुवाकेप्रथमाबृहतीद्वाभ्यांत्रिष्टुभ
द्वादशानुष्टुभेजगत्यौचोक्तानांनानाछंदसांरुद्राणांरुद्रोदेवता अघोरऋषिः शतरुद्रियां
यांसंहितायांसर्वपापक्षयार्थेजपेविनियोगः॥ नमस्तेरुद्रमन्यवइत्यादिरष्टानुवाकाः
॥असंख्यातासहस्राणीतियथालिंगंस्थापनंध्यात्वा॥ नमोअस्तुरुद्रेभ्योयेदिवीतिअंस
दध्यायेत्॥ नमोअस्तुरुद्रेभ्योयेअंतरिक्षइतिनाभिदघ्ने॥ नमोअस्तुरुद्रेभ्योये

येअंतरिक्षइतिनाभिदघ्ने॥ नमोअस्तुरुद्रेभ्योयेपृथिवामितिजानुदघ्नेध्यायेत्॥ अघोरेभ्यइति
जपित्वा॥ यःपथइतिविसर्जयेत्॥ अप्रतिरथंजपन्गृहमाव्रजेत्॥ तेनोदकेनाभिषिंचेत्॥ द्वि
पदश्चतुष्पदश्चेतन्निसृजपस्यविधानं॥ ॥ इतिमानवगृह्यपरिशिष्टेनिसृजपविधानम्॥
॥ ॥ नैतिकस्यपुनर्वक्ष्यामि॥ पूर्वोक्तेनविधिनास्नात्वासंकल्पशंखउदकंगृहीत्वा
यथालाभेपात्रेवादूर्वापुष्पाएकादशपक्षतमीशानाभिमुखंप्रक्षिपेत्॥ यमुद्दिश्यजपेत्तस्यचै
वमेवविधिः॥ एकावर्त्तंद्विरावर्त्तंत्रिरावर्त्तंसप्तावर्त्तंयद्यारोग्यार्थमष्टावर्त्तंमोक्षार्थि
रुद्रत्रिरावर्त्तंनित्यंनैमित्तिकेअपरिमितंयदिरुद्रः प्रजाभिश्चामयेत्॥ नरपूर्वस्यांदिशिशतरुद्रि
यंजपेत्श्रक्रममाणोजपेत्॥ एकाहेजपेरोगपापेः प्रमुच्येतं॥ त्र्यहजपेनब्रह्महत्यादिपापैः कु
ष्ठादिभ्यः प्रमुच्येत॥ अनेनविधिनाग्रामनेनस्त्रीश्रवणेनश्राध्याऽमंत्रितोनपशुसंनिधौनपू
र्वापरंरात्रींब्रह्मचारीनांसुंजदर्शनेनरजस्वलादर्शनेनव्यायामंकुर्वीतसमासेषुयथाकामंप्रार्थ
यित्वाआघोरेभ्यइतिजपित्वा॥ यःपथइतिविसर्जयेत्॥ तेनोदकेनयजमानमभिषिंचेत्॥
अप्रतिरथंजपन्गृहमावर्त्तयेत्॥ ब्राह्मणोयोजपेत्ससर्वान्कामान्वाप्नुयात्॥ विधिहो
नेविपरीतंस्यात्ब्राह्मणस्य यजमानस्यच॥ २॥ शुचिस्नातोजितेंद्रियोलघ्वाशीऋषिछं
दोदेवताविनियोगोन्यासपूर्वकंरुद्रंजपेत्॥ अघोरऋषिरुद्रोदेवता बृहतीछंदः॥ सर्वकम
णिन्यासेविनियोगः॥ आग्नेयेरुद्रपशुंकरोमीसेनादनुवाकस्येतिहृदयं॥ इदंविष्णुरिति च
क्रमेइत्सेनादनुवाकस्येतिशिरः॥ ब्रह्मणस्पतइतिषट्ऋचंब्राह्मजज्ञानंब्रह्मानामितिशिखा॥
अप्रतिरथंइतिकवचं॥ आदिनामवसानान्तनेनेतिद्वौषट्ऋचौचरुद्रौ॥ शतरुद्रियमवस्त्रे॥

एवंन्यासमावाहनविसर्जनांतान्प्रणम्यजपंनिवेदयेत्॥पालाशसमिधआज्यप्लुतोमिलाद्युतिभिःन
मःशंभवेचेतिनिस्रभिः षट्त्रिंशद्वाजुहुयात्॥स्नानतर्पणजपहोमार्चनरतोयः सं२वत्सरे
२ जपेत्॥सदृशंफलमाप्नोति॥ब्रह्मघ्नोनिविशुध्यति॥सुरापः स्वर्णहर्तागोघ्नोवावृषलीपतिः
॥मुच्यतेसर्वपापेभ्योरुद्रलोकंसगच्छति॥रुद्रजापीहतंदृष्ट्वामनसायकल्पते॥३॥ ॥
इतिमानवगृह्यपरिशिष्टेरुद्रजपविधानसमाप्तः॥७॥ ॥शुभंभवेतु॥ ॥
इदंपुस्तकंस्वार्थंपरंच॥श्रीकाशिविश्वेश्वरार्पणमस्तु॥७॥श्रीरस्तु॥७॥ ॥
श्रीरामकृष्णार्पणमस्तु॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥७॥७॥७॥७॥७॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

६

इतिश्रतिग्रहकल्पसंपूर्णम्॥ श्रीरामचंद्रं॥